## कारकाद् दत्तश्रुतयोरेवाशिषि । (१४८/३८८२)

सञ्ज्ञायाम् इति वर्तते, क्तः इति च । सञ्ज्ञायां विषये आशिषि गम्यमानायां कारकादुत्तरयोः दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तो भवति । देवा एनं देयासुः [1]देवदत्तः । विष्णुरेनं श्रूयात् विष्णुश्रुतः[2] । कारकात् इति किम् ? कारकान्नियमो मा भूत् । सम्भूतो रामायणः । दत्तश्रुतयोः इति किम् ? देवपालितः । एतस्मान्नियमादत्र 'सञ्ज्ञायामनाचितादीनाम्' (६.२.१४६/३८८०) इत्यन्तोदात्तत्वं न भवति । 'तृतीया कर्मणि' (६.२.४८/३७८२) इत्येवात्र भवति । एवकारकरणं किम् ? कारकावधारणं यथा स्यात्, दत्तश्रुतावधारणं मा भूत् । अकारकादपि[3] दत्तश्रुतयोरन्त उदात्तो भवति । संश्रुतः । विश्रुतः । आशिषि इति किम् ? अनाशिषि नियमो मा भूत् । देवैः खाता देवखाता । कारकाद् दत्तश्रुतयोराशिष्येव इत्येवमत्र नियम इष्यते । तेन आहतो नवति देवदत्तः इत्यत्र न भवति । देवदत्त इति कस्यचिच्छङ्खस्य नाम । तत्र 'तृतीया कर्मणि' (६.२.४८/३७८२) इति पूर्वपदप्रकृतिस्वरत्वमेव भवति ।

## इत्थंभूतेन कृतमिति च । (१४९/३८८३)

[4]इमं प्रकारमापन्न इत्थम्भूतः । इत्थंभूतेन कृतमित्येतस्मिन्नर्थे यः समासो वर्तते तत्र क्तान्तमुत्तरपदमन्तोदात्तं भवति । सुप्तप्रलपितम् । [5]उन्मत्तप्रलपितम् । प्रमत्तगीतम् । विपन्नश्रुतम् ।

कृतम् इति क्रियासामान्ये करोतिर्वर्तते, नाभूतप्रादुर्भाव एव । तेन प्रलपिताद्यपि कृतं भवति । 'तृतीया कर्मणि' (६.२.४८/३७८२) इत्यस्यायमपवादः । भावे [6]तु यदा प्रलपितादयस्तदा थाथादिस्वरेणैव (६.२.१४४/३८७८) [7]सिद्धमन्तोदात्तत्वं भवति ॥

## अनो भावकर्मवचनः । (१५०/३८८४)

अनप्रत्ययान्तमुत्तरपदं भाववचनं कर्मवचनं च कारकात् परमन्तोदात्तं भवति । ओदनभोजनं सुखम् । [8]पयःपानम् सुखम् । चन्दनप्रियङ्गुकालेपनं सुखम् । कर्मवचनः – राजभोजनाः शालयः । राजाच्छादनानि वासांसि । 'कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम्' (३.३.११६/३२९१) इत्ययं योगः उभयथा वर्ण्यते । कर्मण्युपपदे भावे [9]ल्युड् भवति, कर्मण्यभिधेये [10]ल्युड् भवति इति । तत्र [11]पूर्वस्मिन् सूत्रार्थे भाववचनोदाहरणानि, उत्तरत्र कर्मवचनोदाहरणानि । अनः इति किम् ? हस्तहार्यमुदश्वित् । भावकर्मवचनः इति किम् ? दन्तधावनम्[12] । करणे ल्युट् । कारकात् इत्येव । [13]निदर्शनम् । अवलेखनम् । सर्वेषु प्रत्युदाहरणेषु [14]प्रकृतिस्वरो भवति ॥

---

1. यज्ञदत्तः ब. क. फ. 2. ब्रह्मश्रुतः इत्यधिकम् ङ. 3. हि इत्यधिकम् फ. 4. एवं प्रकारम् क. 5. प्रकुपितप्रतिकृतम् क. 6. तु नास्ति फ. 7. सिद्धं नास्ति क. ह, सिद्धान्तोदात्तता फ. 8. एवं इत्यधिकम् ङ. ह. 9. धातोः ल्युट्प्रत्ययो ब. क. ह. 10. ल्युट् प्रत्ययः फ. 11. पूर्वस्मिन् सूत्रार्थे नास्ति ग. 12. काष्ठम् इत्यधिकम् फ. 13. निदर्शनसेवनम् ह. 14. कृत्स्वरो ह.